

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## प्रथमकाण्डे सप्तमः प्रश्नः

### याजमान ब्राह्मणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

पाकयज्ञव्वै। पाकयज्ञमिति पाक—यज्ञम्। वा अनु। अन्वाहिताग्नेः। आहिताग्नेः पशवः। आहिताग्नेरित्याहित—अग्नेः। पशव उप। उप तिष्ठन्ते। तिष्ठन्त इडा। इडा खलु। खलु वै। वै पाकयज्ञः। पाकयज्ञः सा। पाकयज्ञ इति पाक—यज्ञः। सैषा। एषाऽन्तरा। अन्तरा प्रयाजानूयाजान्। प्रयाजानूयाजान्यजमानस्य। प्रयाजानूयाजानिति प्रयाज—अनूयाजान्। यजमानस्य लोके। लोकेऽवहिता। अवहिता ताम्। अवहितेत्यव—हिता। तामाह्वियमाणाम्। आह्वियमाणामभि। आह्वियमाणामित्या—ह्वियमाणाम्। अभि मन्त्रयेत। मन्त्रयेत सुरूपवर्षवर्णे। सुरूपवर्षवर्ण आ। सुरूपवर्षवर्ण इति सुरूप—वर्षवर्णे। एहि। इहीति। इति पशवः। पशवो वै। वा इडा। इडा पशून्। पशूनेव। एवोप। उप ह्वयते। ह्वयते यज्ञम्। यज्ञव्वै। वै देवाः। देवा अदुह्रन्न्। अदुह्रन्यज्ञः। यज्ञो ऽसुरान्। असुराꣳ अदुहत्। अदुहत् ते। तेऽसुराः। असुरा यज्ञदुग्धाः। यज्ञदुग्धाः परा। यज्ञदुग्धा इति यज्ञ—दुग्धाः। पराऽभवन्न्। अभवन्यः। यो वै। वै यज्ञस्य। यज्ञस्य दोहम्। दोहव्विद्वान्। विद्वान्यजते। ॥ [१] ॥ यजतेऽपि। अप्यन्यम्। अन्यय्ँय्यजमानम्। यजमानम् दुहे। दुहे सा। सा मे। मे सत्या। सत्याऽऽशीः। आशीरस्य। आशीरित्या—शीः। अस्य यज्ञस्य। यज्ञस्य भूयात्। भूयादिति। इत्याह। आहैषः। एष वै। वै यज्ञस्य। यज्ञस्य दोहः। दोहस्तेन। तेनैव। एवैनम्। एनम् दुहे। दुहे प्रत्ता। प्रत्ता वै। वै गौः। गौर्दुहे। दुहे प्रत्ता। प्रत्तेडा। इडा यजमानाय। यजमानाय दुहे। दुह एते। एते वै। वा

इडायै। इडायै स्तनाः। स्तना इडा। इडोपहूता। उपहूतेति। उपहूतेत्युप—हूता। इति वायुः। वायुर्वथ्सः। वथ्सो यर्हि। यर्हि होता। होतेडाम्। इडामुपह्वयेत। उपह्वयेत तर्हि। उपह्वये-तेत्युप—ह्वयेत। तर्हि यजमानः। यजमानो होतारम्। होतारमीख्षमाणः। ईख्षमाणो वायुम्। वायुम् मनसा। मनसा ध्यायेत्। ध्यायेन्मात्रे। ॥ [२] ॥ मात्रे वथ्सम्। वथ्समुपावसृजति। उपावसृजति सर्वेण। उपावसृजतीत्युप—अवसृजति। सर्वेण वै। वै यज्ञेन। यज्ञेन देवाः। देवाः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन् पाकयज्ञेन। पाकयज्ञेन मनुः। पाकयज्ञेनेति पाक—यज्ञेन। मनुरश्राम्यत्। अश्राम्यथ् सा। सेडा। इडा मनुम्। मनु-मुपावर्तत। उपावर्तत ताम्। उपावर्ततेत्युप—आवर्तत। ताम्देवासुराः। देवासुरा वि। देवा-सुरा इति देव—असुराः। व्यह्वयन्त। अह्वयन्त प्रतीचीम्। प्रतीचीम् देवाः। देवाः पराचीम्। पराचीमसुराः। असुराः सा। सा देवान्। देवानुपावर्तत। उपावर्तत पशवः। उपावर्ततेत्युप—आवर्तत। पशवो वै। वै तत्। तद् देवान्। देवानवृणत। अवृणत पशवः। पशवो ऽसुरान्। असुरानजहुः। अजहुर्यम्। यम् कामयेत। कामयेतापशुः। अपशुः स्यात्। स्यादिति। इति पराचीम्। पराचीम् तस्य। तस्येडाम्। इडामुप। उप ह्वयेत। ह्वयेतापशुः। अपशुरेव। एव भवति। भवति यम्। यम् कामयेत। ॥ [३] ॥ कामयेत पशुमान्। पशुमान्थ् स्यात्। पशु-मानिति पशु—मान्। स्यादिति। इति प्रतीचीम्। प्रतीचीम् तस्य। तस्येडाम्। इडामुप। उप ह्वयेत। ह्वयेत पशुमान्। पशुमानेव। पशुमानिति पशु—मान्। एव भवति। भवति ब्रह्मवा-दिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति सः। स तु। त्वै। वा इडाम्। इडामुप। उप ह्वयेत। ह्वयेत यः। य इडाम्। इडामुपहूय। उपहूयात्मानम्। उप-हूयेत्युप—हूय। आत्मानमिडायाम्। इडायामुपह्वयेत। उपह्वयेतेति। उपह्वयेतेत्युप—ह्वयेत। इति सा। सा नः। नः प्रिया। प्रिया सुप्रतूर्तिः। सुप्रतूर्तिर्मघोनी। सुप्रतूर्तिरिति सु—प्रतूर्तिः। मघोनीति। इत्याह। आहेडाम्। इडामेव। एवोपहूय। उपहूयात्मानम्। उपहूयेत्युप—हूय। आत्मानमिडायाम्। इडायामुप। उप ह्वयते। ह्वयते व्यस्तम्। व्यस्तमिव। व्यस्तमिति वि—अस्तम्। इव वै। वा एतत्। एतद् यज्ञस्य। यज्ञस्य यत्। यदिडा। इडा सामि। सामि प्राश्ञन्ति। प्राश्ञन्ति सामि। प्राश्ञन्तीति प्र—अश्ञन्ति। ॥ [४] ॥ सामि मार्जयन्ते। मार्जयन्त एतत्।

एतत्,प्रति। प्रति वै। वा असुराणाम्। असुराणाय्ँय्यज्ञः। यज्ञो वि। व्यच्छिद्यत। अच्छिद्यत ब्रह्मणा। ब्रह्मणा देवाः। देवाः सम्। समदधुः। अदधुर्,बृहस्पतिः। बृहस्पति स्तनुताम्। तनुतामिमम्। इमम् नः। न इति। इत्याह। आह ब्रह्म। ब्रह्म वै। वै देवानाम्। देवानाम् बृहस्पतिः। बृहस्पतिर्,ब्रह्मणा। ब्रह्मणैव। एव यज्ञम्। यज्ञꣳ सम्। सम् दधाति। दधाति विच्छिन्नम्। विच्छिन्नय्ँय्यज्ञम्। विच्छिन्नमिति वि—छिन्नम्। यज्ञꣳ सम्। समिमम्। इमम् दधातु। दधात्विति। इत्याह। आह सन्तत्यै। सन्तत्यै विश्वे। सन्तत्या इति सम्—तत्यै। विश्वे देवाः। देवा इह। इह मादयन्ताम्। मादयन्तामिति। इत्याह। आह सन्तत्य। सन्तत्यैव। सन्तत्येति सं—तत्य। एव यज्ञम्। यज्ञम् देवेभ्यः। देवेभ्योऽनु। अनु दिशति। दिशति याम्। याव्ँवै। वै यज्ञे। ॥ [५] ॥ यज्ञे दक्षिणाम्। दक्षिणाम् ददाति। ददाति ताम्। तामस्य। अस्य पशवः। पशवोऽनु। अनु सम्। सम् क्रामन्ति। क्रामन्ति सः। स एषः। एष ईजानः। ईजानोऽपशुः। अपशुर्,भावुकः। भावुको यजमानेन। यजमानेन खलु। खलु वै। वै तत्। तत् कार्यम्। कार्यमिति। इत्याहुः। आहुर्,यथा। यथा देवत्रा। देवत्रा दत्तम्। देवत्रेति देव—त्रा। दत्तम् कुर्वीत। कुर्वीतात्मन्न्। आत्मन् पशून्। पशून्,रमयेत। रमयेतेति। इति ब्रद्ध्न। ब्रद्ध्न पिन्वस्व। पिन्वस्वेति। इत्याह। आह यज्ञः। यज्ञो वै। वै ब्रद्ध्नः। ब्रद्ध्नो यज्ञम्। यज्ञमेव। एव तत्। तन्महयति। महयत्यथो। अथो देवत्रा। अथो इत्यथो। देवत्रैव। देवत्रेति देव—त्रा। एव दत्तम्। दत्तम् कुरुते। कुरुत आत्मन्न्। आत्मन्,पशून्। पशून्,रमयते। रमयते ददतः। ददतो मे। मे मा। मा क्षायि। क्षायीति। इत्याह। आहाक्षितिम्। अक्षितिमेव। एवोप। उपैति। एति कुर्वतः। कुर्वतो मे। मे मा। मोप। उप दसत्। दसदिति। इत्याह। आह भूमानम्। भूमानमेव। एवोप। उपैति। एतीत्येति॥ ॥ [६] ॥

(विद्वान्ध्यायेद्भवति यंप्राश्नन्तियाव्ँवैमएकान्न विꣳशतिश्च) ॥ १ ॥

सङ्ँश्रवा ह। सङ्ँश्रवा इति सम्—श्रवाः। ह सौवर्चनसः। सौवर्चनस,स्तुमिञ्जम्। तुमिञ्जमौपोदितिम्। औपोदितिमुवाच। औपोदितिमित्यौप—उदितिम्। उवाच यत्। यथ् सत्रिणाम्। सत्रिणाꣳ होता। होताऽभूः। अभूः काम्। कामिडाम्। इडामुप। उपाह्वथाः। अह्वथा इति। इति

ताम्। तामुप॑। उपा॑ह्वे। अह्व इति॑। इति॑ ह। होवाच। उवाच या। या प्राणेन॑। प्राणेन॑ देवान्। प्राणेनेति॑ प्र—अनेन॑। देवान्,दाधार॑। दाधार॑ व्यानेन॑। व्यानेन॑ मनुष्यान्। व्यानेनेति॑ वि—अनेन॑। मनुष्या॑नपानेन॑। अपानेन॑ पितॄन्। अपानेनेत्य॑प—अनेन॑। पितॄनिति॑। इति॑ छिनत्ति॑। छिनत्ति सा। सा न। न छिनत्ती(३)। छिनत्ती(३) इति॑। इति॑ छिनत्ति॑। छिनत्तीति॑। इति॑ ह। होवाच। उवाच शरीर॑म्। शरीर॑व्वै॑। वा अ॑स्यै। अस्यै तत्। तदुप॑। उपा॑ह्वथाः। अह्वथा इति॑। इति॑ ह। होवाच। उवाच गौः। गौर् वै। वा अ॑स्यै। ॥ [७] ॥ अस्यै शरीर॑म्। शरीर॑म् गाम्। गाव्वाव। वाव तौ। तौ तत्। तत,परि॑। पर्य॑वदताम्। अवदताय्॑या। या यज्ञे। यज्ञे दीयते॑। दीयते सा। सा प्राणेन॑। प्राणेन॑ देवान्। प्राणेनेति॑ प्र—अनेन॑। देवान्,दाधार। दाधार यया॑। यया॑ मनुष्या॑ः। मनुष्या॑ जीव॑न्ति। जीव॑न्ति सा। सा व्यानेन॑। व्यानेन॑ मनुष्या॑न्। व्यानेनेति॑ वि—अनेन॑। मनुष्या॑न्याम्। याम् पितृभ्य॑ः। पितृभ्यो घ्नन्ति॑। पितृभ्य इति॑ पितृ—भ्यः। घ्नन्ति सा। साऽपानेन॑। अपानेन॑ पितॄन्। अपानेनेत्य॑प—अनेन॑। पितॄन्यः। य एवम्। एवव्वेद॑। वेद॑ पशुमान्। पशुमान् भ॑वति। पशुमानिति॑ पशु—मान्। भवत्यथ॑। अथ वै। वै ताम्। तामुप॑। उपा॑ह्वे। अह्व इति॑। इति॑ ह। होवाच। उवाच या। या प्रजाः। प्रजाः प्रभव॑न्तीः। प्रजा इति॑ प्र—जाः। प्रभव॑न्तीः प्रति॑। प्रभव॑न्तीरिति॑ प्र—भव॑न्तीः। प्रत्याभव॑ति। आभवतीति॑। आभव-तीत्या॑—भव॑ति। इत्यन्न॑म्। अन्नव्वै॑। वा अ॑स्यै। अस्यै तत्। तदुप॑। ॥ [८] ॥ उपा॑ह्वथाः। अह्वथा इति॑। इति॑ ह। होवाच। उवाचौष॑धयः। ओष॑धयो वै। वा अ॑स्याः। अस्या अन्न॑म्। अन्नमोष॑धयः। ओष॑धयो वै। वै प्रजाः। प्रजाः प्रभव॑न्तीः। प्रजा इति॑ प्र—जाः। प्रभव॑न्तीः प्रति॑। प्रभव॑न्तीरिति॑ प्र—भव॑न्तीः। प्रत्या। आ भ॑वन्ति। भवन्ति यः। य एवम्। एवव्वेद॑। वेदा॑न्नादः। अन्नादो भ॑वति। अन्नाद इत्य॑न्न—अदः। भवत्यथ॑। अथ वै। वै ताम्। तामुप॑। उपा॑ह्वे। अह्व इति॑। इति॑ ह। होवाच। उवाच या। या प्रजाः। प्रजाः प॑राभव॑न्तीः। प्रजा इति॑ प्र—जाः। पराभव॑न्तीरनुगृह्णाति॑। पराभव॑न्तीरिति॑ परा—भव॑न्तीः। अनुगृह्णाति प्रति॑। अनुगृह्णातीत्य॑नु—गृह्णाति॑। प्रत्याभव॑न्तीः। आभव॑न्तीर् गृह्णाति॑। आभव॑न्तीरित्या॑—भव॑न्तीः। गृह्णातीति॑। इति॑ प्रतिष्ठाम्। प्रतिष्ठाव्वै॑। प्रतिष्ठामिति॑ प्रति—स्थाम्। वा अ॑स्यै। अस्यै तत्। तदुप॑। उपा॑ह्वथाः। अह्वथा इति॑। इति॑ ह। होवाच। उवाचेयम्। इयव्वै॑। वा अ॑स्यै। अस्यै प्रतिष्ठा। प्रतिष्ठेयम्।

प्रतिष्ठेति प्रति—स्था। ॥ [९] ॥ इयँव्वै। वै प्रजाः। प्रजाः पराभवन्तीः। प्रजा इति प्र—जाः। पराभवन्तीरनु। पराभवन्तीरिति परा—भवन्तीः। अनु गृह्णाति। गृह्णाति प्रति। प्रत्याभवन्तीः। आभवन्तीर्, गृह्णाति। आभवन्तीरित्या—भवन्तीः। गृह्णाति यः। य एवम्। एवँव्वेद। वेद प्रति। प्रत्येव। एव तिष्ठति। तिष्ठत्यथ। अथ वै। वै ताम्। तामुप। उपाह्व। अह्व इति। इति ह। होवाच। उवाच यस्यै। यस्यै निक्रमणे। निक्रमणे घृतम्। निक्रमण इति नि—क्रमणे। घृतम् प्रजाः। प्रजाः सञ्जीवन्तीः। प्रजा इति प्र—जाः। सञ्जीवन्तीः पिबन्ति। सञ्जीवन्तीरिति सम्—जीवन्तीः। पिबन्तीति। इति छिनत्ति। छिनत्ति सा। सा न। न छिनत्ती(३)। छिनत्ती(३) इति। इति न। न छिनत्ति। छिनत्तीति। इति ह। होवाच। उवाच प्र। प्र तु। तु जनयति। जनयतीति। इत्येषः। एष वै। वा इडाम्। इडामुप। उपाह्वथाः। अह्वथा इति। इति ह। होवाच। उवाच वृष्टिः। वृष्टिर् वै। वा इडा। इडा वृष्ट्यै। वृष्ट्यै वै। वै निक्रमणे। निक्रमणे घृतम्। निक्रमण इति नि—क्रमणे। घृतम् प्रजाः। प्रजाः सञ्जीवन्तीः। प्रजा इति प्र—जाः। सञ्जीवन्तीः पिबन्ति। सञ्जीवन्तीरिति सम्—जीवन्तीः। पिबन्ति यः। य एवम्। एवँव्वेद। वेद प्र। प्रैव। एव जायते। जायते ऽन्नादः। अन्नादो भवति। अन्नाद इत्यन्न—अदः। भवतीति भवति॥ ॥ [१०] ॥

(गौर्वा अस्यैतत्प्रतिष्ठाऽह्वथाइतिविꣳशतिश्च) ॥ २ ॥

परोक्षँव्वै। परोक्षमिति परः—अक्षम्। वा अन्ये। अन्ये देवाः। देवा इज्यन्ते। इज्यन्ते प्रत्यक्षम्। प्रत्यक्षमन्ये। प्रत्यक्षमिति प्रति—अक्षम्। अन्ये यत्। यद् यजते। यजते ये। य एव। एव देवाः। देवाः परोक्षम्। परोक्षमिज्यन्ते। परोक्षमिति परः—अक्षम्। इज्यन्ते तान्। तानेव। एव तत्। तद् यजति। यजति यत्। यदन्वाहार्यम्। अन्वाहार्यमाह-रति। अन्वाहार्यमित्यनु—आहार्यम्। आहरत्येते। आहरतीत्या—हरति। एते वै। वै देवाः। देवाः प्रत्यक्षम्। प्रत्यक्षँय्यत्। प्रत्यक्षमिति प्रति—अक्षम्। यद् ब्राह्मणाः। ब्राह्मणास्तान्। तानेव। एव तेन। तेन प्रीणाति। प्रीणात्यथो। अथो दक्षिणा। अथो इत्यथो। दक्षिणैव। एवास्य। अस्यैषा। एषाऽथो। अथो यज्ञस्य। अथो इत्यथो। यज्ञस्यैव। एव छिद्रम्। छिद्रमपि। अपि दधाति। दधाति यत्। यद् वै। वै यज्ञस्य। यज्ञस्य क्रूरम्। क्रूरँय्यत्। यद् विलिष्टम्।

विलिष्टम् तत्। विलिष्टमिति वि—लिष्टम्। तदन्वाहार्येण। अन्वाहार्येणान्वाहरति। अन्वाहार्येणेत्यनु—आहार्येण। ॥ [११] ॥ अन्वाहरति तत्। अन्वाहरतीत्यनु—आहरति। तदन्वाहार्यस्य। अन्वाहार्यस्यान्वाहार्यत्वम्। अन्वाहार्यस्येत्यनु—आहार्यस्य। अन्वाहार्यत्वम् देवदूताः। अन्वाहार्यत्वमित्यन्वाहार्य—त्वम्। देवदूता वै। देवदूता इति देव—दूताः। वा एते। एते यत्। यदृत्विजः। ऋत्विजो यत्। यदन्वाहार्यम्। अन्वाहार्यमाहरति। अन्वाहार्यमित्यनु—आहार्यम्। आहरति देवदूतान्। आहरतीत्या—हरति। देवदूतानेव। देवदूतानिति देव—दूतान्। एव प्रीणाति। प्रीणाति प्रजापतिः। प्रजापतिर्,देवेभ्यः। प्रजापतिरिति प्रजा—पतिः। देवेभ्यो यज्ञान्। यज्ञान्,व्यादिशत्। व्यादिशथ् सः। व्यादिशदिति वि—आदिशत्। स रिरिचानः। रिरिचानोऽमन्यत। अमन्यत सः। स एतम्। एतमन्वाहार्यम्। अन्वाहार्यमभक्तम्। अन्वाहार्यमित्यनु—आहार्यम्। अभक्तमपश्यत्। अपश्यत् तम्। तमात्मन्न्। आत्मन्नधत्त। अधत्त सः। स वै। वा एषः। एष प्राजापत्यः। प्राजापत्यो यत्। प्राजापत्य इति प्राजा—पत्यः। यदन्वाहार्यः। अन्वाहार्यो यस्य। अन्वाहार्य इत्यनु—आहार्यः। यस्यैवम्। एवँव्विदुषः। विदुषो ऽन्वाहार्यः। अन्वाहार्य आह्रियते। अन्वाहार्य इत्यनु—आहार्यः। आह्रियते साक्षात्। आह्रियत इत्या—ह्रियते। साक्षादेव। साक्षादिति स—अक्षात्। एव प्रजापतिम्। प्रजापतिमृद्ध्नोति। प्रजापतिमिति प्रजा—पतिम्। ऋद्ध्नोत्यपरिमितः। अपरितमितो निरुप्यः। अपरिमित इत्यपरि—मितः। निरुप्यो ऽपरिमितः। निरुप्य इति निः—उप्यः। अपरिमितः प्रजापतिः। अपरिमित इत्यपरि—मितः। प्रजापतिः प्रजापतेः। प्रजापतिरिति प्रजा—पतिः। प्रजापतेराप्त्यै। प्रजापतेरिति प्रजा—पतेः। ॥ [१२] ॥ आप्त्यै देवाः। देवा वै। वै यत्। यद् यज्ञे। यज्ञेऽकुर्वत। अकुर्वत तत्। तदसुराः। असुरा अकुर्वत। अकुर्वत ते। ते देवाः। देवा एतम्। एतम् प्राजापत्यम्। प्राजापत्यमन्वाहार्यम्। प्राजापत्यमिति प्राजा—पत्यम्। अन्वाहार्यमपश्यन्न्। अन्वाहार्यमित्यनु—आहार्यम्। अपश्यन् तम्। तमन्वाहरन्त। अन्वाहरन्त ततः। अन्वाहरन्तेत्यनु—आहरन्त। ततो देवाः। देवा अभवन्न्। अभवन्,परा। परा ऽसुराः। असुरा यस्य। यस्यैवम्। एवँव्विदुषः। विदुषो ऽन्वाहार्यः। अन्वाहार्य आह्रियते। अन्वाहार्य इत्यनु—आहार्यः। आह्रियते भवति। आह्रियत इत्या—ह्रियते। भवत्यात्मना। आत्मना परा।

परोऽस्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवति यज्ञेन। यज्ञेन वै। वा इष्टी। इष्टी पक्वेन। पक्वेन पूर्ती। पूर्ती यस्य। यस्यैवम्। एवँविदुषः। विदुषोऽन्वाहार्यः। अन्वाहार्य आह्रियते। अन्वाहार्य इत्यनु—आहार्यः। आह्रियते सः। आह्रियत इत्या—ह्रियते। स तु। त्वेव। एवेष्टापूर्ती। इष्टापूर्ती प्रजापतेः। इष्टापूर्तीतीष्ट—पूर्ती। प्रजापतेर्भागः। प्रजापतेरिति प्रजा—पतेः। भागोऽसि। असीति। ॥ [१३] ॥ इत्याह। आह प्रजापतिम्। प्रजापतिमेव। प्रजापतिमिति प्रजा—पतिम्। एव भागधेयेन। भागधेयेन सम्। भागधेयेनेति भाग—धेयेन। समर्द्धयति। अर्द्धयत्यूर्जस्वान्। ऊर्जस्वान् पयस्वान्। पयस्वानिति। इत्याह। आहोर्जम्। ऊर्जमेव। एवास्मिन्न्। अस्मिन् पयः। पयो दधाति। दधाति प्राणापानौ। प्राणापानौ मे। प्राणापानाविति प्राण—अपानौ। मे पाहि। पाहि समानव्यानौ। समानव्यानौ मे। समानव्यानाविति समान—व्यानौ। मे पाहि। पाहीति। इत्याह। आहाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। एवैताम्। एतामा। आ शास्ते। शास्तेऽख्षितः। अख्षितोऽसि। अस्यख्षित्यै। अख्षित्यै त्वा। त्वा मा। मा मे। मे ख्षेष्ठाः। ख्षेष्ठा अमुत्र। अमुत्रामुष्मिन्न्। अमुष्मिँल्लोके। लोक इति। इत्याह। आह ख्षीयते। ख्षीयते वै। वा अमुष्मिन्न्। अमुष्मिँल्लोके। लोकेऽन्नम्। अन्नमितःप्रदानम्। इतःप्रदानꣳ हि। इतःप्रदानमितीतः—प्रदानम्। ह्यमुष्मिन्न्। अमुष्मिँल्लोके। लोके प्रजाः। प्रजा उपजीवन्ति। प्रजा इति प्र—जाः। उपजीवन्ति यत्। उपजीवन्तीत्युप—जीवन्ति। यदेवम्। एवमभिमृशति। अभिमृशत्यख्षितिम्। अभिमृशतीत्यभि—मृशति। अख्षितिमेव। एवैनत्। एनद् गमयति। गमयति न। नास्य। अस्यामुष्मिन्न्। अमुष्मिन् लोके। लोकेऽन्नम्। अन्नम् ख्षीयते। ख्षीयत इति ख्षीयते॥ ॥ [१४] ॥

(अन्वाहार्येणप्रजापतेरसिह्यमुष्मिँल्लोकेपञ्चदश च) ॥ ३ ॥

बर्हिषोऽहम्। अहम् देवयज्यया। देवयज्यया प्रजावान्। देवयज्ययेति देव—यज्यया। प्रजावान् भूयासम्। प्रजावानिति प्रजा—वान्। भूयासमिति। इत्याह। आह बर्हिषा। बर्हिषा वै। वै प्रजापतिः। प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत तेन। तेनैव। एव प्रजाः। प्रजाः सृजते। प्रजा इति प्र—जाः। सृजते नरा-

शꣳसंस्य। नराशꣳसंस्याहम्। अहम् देवयज्यया। देवयज्यया पशुमान्। देवयज्ययेति देव—यज्यया। पशुमान् भूयासम्। पशुमानिति पशु—मान्। भूयासमिति। इत्याह। आह नराशꣳ-सेन। नराशꣳसेन वै। वै प्रजापतिः। प्रजापतिः पशून्। प्रजापतिरिति प्रजा—पतिः। पशू-नसृजत। असृजत तेन। तेनैव। एव पशून्। पशून्थ् सृजते। सृजतेऽग्नेः। अग्ने स्विष्टकृतः। स्विष्टकृतोऽहम्। स्विष्टकृत इति स्विष्ट—कृतः। अहम् देवयज्यया। देवयज्यया ऽऽयुष्मान्। देवयज्ययेति देव—यज्यया। आयुष्मान्यज्ञेन। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठा-मिति प्रति—स्थाम्। गमेयमिति। इत्याह। आहायुः। आयुरेव। एवात्मन्न्। आत्मन्,धत्ते। धत्ते प्रति। प्रति यज्ञेन। यज्ञेन तिष्ठति। तिष्ठति दर्शपूर्णमासयोः। दर्शपूर्णमासयोर्,वै। दर्शपूर्णमासयोरिति दर्श—पूर्णमासयोः। ॥ [१५] ॥ वै देवाः। देवा उज्जितिम्। उज्जिति-मनु। उज्जितिमित्युत्—जितिम्। अनूत्। उदजयन्न्। अजयन्,दर्शपूर्णमासाभ्याम्। दर्शपूर्ण-मासाभ्यामसुरान्। दर्शपूर्णमासाभ्यामिति दर्श—पूर्णमासाभ्याम्। असुरानप। अपानुदन्त। अनुदन्ताग्नेः। अग्नेरहम्। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषमिति। इत्याह। आह दर्शपूर्णमासयोः। दर्शपूर्णमासयोरेव। दर्शपूर्णमासयो-रिति दर्श—पूर्णमासयोः। एव देवतानाम्। देवतानाय्ँयजमानः। यजमान उज्जितिम्। उज्जि-तिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जयति। जयति दर्शपूर्णमासाभ्याम्। दर्शपू-र्णमासाभ्याम् भ्रातृव्यान्। दर्शपूर्णमासाभ्यामिति दर्श—पूर्णमासाभ्याम्। भ्रातृव्यानप। अप नुदते। नुदते वाजवतीभ्याम्। वाजवतीभ्याव्ँवि। वाजवतीभ्यामिति वाज—वतीभ्याम्। व्यूहति। ऊहत्यन्नम्। अन्नव्ँवै। वै वाजः। वाजोऽन्नम्। अन्नमेव। एवाव। अव रुन्धे। रुन्धे द्वाभ्याम्। द्वाभ्याम् प्रतिष्ठित्यै। प्रतिष्ठित्यै यः। प्रतिष्ठित्या इति प्रति—स्थित्यै। यो वै। वै यज्ञस्य। यज्ञस्य द्वौ। द्वौ दोहौ। दोहौ विद्वान्। विद्वान्यजते। यजत उभयतः। उभयत एव। ॥ [१६] ॥ एव यज्ञम्। यज्ञम् दुहे। दुहे पुरस्तात्। पुरस्ताच्च। चोपरिष्टात्। उपरिष्टाच्च। चैषः। एष वै। वा अन्यः। अन्यो यज्ञस्य। यज्ञस्य दोहः। दोह इडायाम्। इडायामन्यः। अन्यो यर्हि। यर्हि होता। होता यजमानस्य। यजमानस्य नाम। नाम गृह्णीयात्। गृह्णीयात,तर्हि। तर्हि ब्रूयात्। ब्रूयादा। एमाः। इमा अग्मन्न्। अग्मन्नाशिषः। आशिषो दोहकामाः। आशिष इत्या—शिषः।

दोहकामा इति। दोहकामा इति दोह—कामाः। इति सङ्स्तुताः। सङ्स्तुता एव। सङ्स्तुता इति सं—स्तुताः। एव देवताः। देवता दुहे। दुहेऽथो। अथो उभयतः। अथो इत्यथो। उभयत एव। एव यज्ञम्। यज्ञम् दुहे। दुहे पुरस्तात्। पुरस्ताच्च। चोपरिष्टात्। उपरिष्टाच्च। च रोहितेन। रोहि-तेन त्वा। त्वाऽग्निः। अग्निर्,देवताम्। देवताम् गमयतु। गमयत्विति। इत्याह। आहैते। एते वै। वै देवाश्वाः। देवाश्वा यजमानः। देवाश्वा इति देव—अश्वाः। ॥ [१७] ॥ यजमानः प्रस्तरः। प्रस्तरो यत्। प्रस्तर इति प्र—स्तरः। यदेतैः। एतैः प्रस्तरम्। प्रस्तरम् प्रहरति। प्रस्तरमिति प्र—स्तरम्। प्रहरति देवाश्वैः। प्रहरतीति प्र—हरति। देवाश्वैरेव। देवाश्वैरिति देव—अश्वैः। एव यजमानम्। यजमानꣳ सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् गमयति। गमयति वि। वि ते। ते मुञ्चामि। मुञ्चामि रशनाः। रशना वि। वि रश्मीन्। रश्मीनिति। इत्याह। आहैषः। एष वै। वा अग्नेः। अग्नेर्,विमोकः। विमोकस्तेन। विमोक इति वि—मोकः। तेनैव। एवैनम्। एनाँव्वि। वि मुञ्चति। मुञ्चति विष्णोः। विष्णोः शय्योः। शय्योरहम्। शय्योरिति शं—योः। अहम् देवयज्यया। देवयज्यया यज्ञेन। देवयज्ययेति देव—यज्यया। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठामिति प्रति—स्थाम्। गमेयमिति। इत्याह। आह यज्ञः। यज्ञो वै। वै विष्णुः। विष्णुर्,यज्ञे। यज्ञ एव। एवान्ततः। अन्ततः प्रति। प्रति तिष्ठति। तिष्ठति सोमस्य। सोमस्याहम्। अहम् देवयज्यया। देवयज्यया सुरेताः। देवयज्ययेति देव—यज्यया। सुरेता रेतः। सुरेता इति सु—रेताः। ॥ [१८] ॥ रेतो धिषीय। धिषीयेति। इत्याह। आह सोमः। सोमो वै। वै रेतोधाः। रेतोधास्तेन। रेतोधा इति रेतः—धाः। तेनैव। एव रेतः। रेत आत्मन्न्। आत्मन्,धत्ते। धत्ते त्वष्टुः। त्वष्टुरहम्। अहम् देवयज्यया। देवयज्यया पशूनाम्। देवयज्ययेति देव—यज्यया। पशूनाꣳ रूपम्। रूपम् पुषेयम्। पुषेयमिति। इत्याह। आह त्वष्टा। त्वष्टा वै। वै पशूनाम्। पशूनाम् मिथुनानाम्। मिथुनानाꣳ रूपकृत्। रूपकृत,तेन। रूपकृदिति रूप—कृत्। तेनैव। एव पशूनाम्। पशूनाꣳ रूपम्। रूपमात्मन्न्। आत्मन्,धत्ते। धत्ते देवानाम्। देवानाम् पत्नीः। पत्नीरग्निः। अग्निर्,गृहपतिः। गृहपतिर्,यज्ञस्य। गृहपतिरिति गृह—पतिः। यज्ञस्य मिथुनम्। मिथुनम् तयोः। तयोरहम्। अहम् देवयज्यया। देवयज्यया मिथुनेन। देवयज्ययेति देव—यज्यया। मिथुनेन प्र। प्र भूयासम्। भूयासमिति। इत्याह। आहैतस्मात्। एतस्माद् वै।

वै मिथुनात्। मिथुनात् प्रजापतिः। प्रजापतिर् मिथुनेन। प्रजापतिरिति प्रजा—पतिः। मिथुनेन प्र। ॥ [१९] ॥ प्राजायत। अजायत तस्मात्। तस्मादेव। एव यजमानः। यजमानो मिथु-नेन। मिथुनेन प्र। प्र जायते। जायते वेदः। वेदोऽसि। असि वित्तिः। वित्तिरसि। असि विदेय। विदेयेति। इत्याह। आह वेदेन। वेदेन वै। वै देवाः। देवा असुराणाम्। असुराणाँव्वित्तम्। वित्त-वँव्वेद्यम्। वेद्यमविन्दन्त। अविन्दन्त तत्। तद् वेदस्य। वेदस्य वेदत्वम्। वेदत्वयँय्यद्यत्। वेद-त्वमिति वेद—त्वम्। यद्यद् भ्रातृव्यस्य। यद्यदिति यत्—यत्। भ्रातृव्यस्याभिद्ध्यायेत्। अभि-द्ध्यायेत,तस्य। अभिद्ध्यायेदित्यभि—ध्यायेत्। तस्य नाम। नाम गृह्णीयात्। गृह्णीयात,तत्। तदेव। एवास्य। अस्य सर्वम्। सर्वँव्वृङ्क्ते। वृङ्क्ते घृतवन्तम्। घृतवन्तम् कुलायिनम्। घृत-वन्तमिति घृत—वन्तम्। कुलायिनꣳ रायः। रायस्पोषम्। पोषꣳ सहस्रिणम्। सहस्रिणँव्वेदः। वेदो ददातु। ददातु वाजिनम्। वाजिनमिति। इत्याह। आह प्र। प्र सहस्रम्। सहस्रम् पशून्। पशूनाप्नोति। आप्नोत्या। आऽस्य। अस्य प्रजायाम्। प्रजायाँव्वाजी। प्रजायामिति प्र—जायाम्। वाजी जायते। जायते यः। य एवम्। एवँव्वेद। वेदेति वेद॥ ॥ [२०] ॥

(दर्शपूर्णमासयोरुभयतोदेवाश्चासुरेताःप्रजापतिर्मिथुनेनाऽऽप्नोत्यष्टौ च) ॥ ४ ॥

ध्रुवाँव्वै। वै रिच्यमानाम्। रिच्यमानायँय्यज्ञः। यज्ञोऽनु। अनु रिच्यते। रिच्यते यज्ञम्। यज्ञयँय्यजमानः। यजमानो यजमानम्। यजमानम् प्रजाः। प्रजा ध्रुवाम्। प्रजा इति प्र—जाः। ध्रुवामाप्यायमानाम्। आप्यायमानायँय्यज्ञः। आप्यायमानामित्या—प्यायमानाम्। यज्ञोऽनु। अन्वा। आ प्यायते। प्यायते यज्ञम्। यज्ञयँय्यजमानः। यजमानो यजमानम्। यजमानम् प्रजाः। प्रजा आ। प्रजा इति प्र—जाः। आ प्यायताम्। प्यायताम् ध्रुवा। ध्रुवा घृतेन। घृतेनेति। इत्याह। आह ध्रुवाम्। ध्रुवामेव। एवा। आ प्याययति। प्याययति ताम्। तामाप्यायमानाम्। आप्यायमानायँय्यज्ञः। आप्यायमानामित्या—प्यायमानाम्। यज्ञोऽनु। अन्वा। आ प्यायते। प्यायते यज्ञम्। यज्ञयँय्यजमानः। यजमानो यजमानम्। यजमानम् प्रजाः। प्रजाः प्रजापतेः। प्रजा इति प्र—जाः। प्रजापतेर्,विभान्। प्रजापतेरिति प्रजा—पतेः। विभान्नाम। विभानिति वि—भान्। नाम लोकः। लोकस्तस्मिन्न्। तस्मिꣳ त्वा। त्वा दधामि। दधामि सह। सह यजमानेन।

यजमानेनेति। इत्याह। ॥ [२१] ॥ आहायम्। अयव्वै। वै प्रजापतेः। प्रजापतेर्,विभान्। प्रजापतेरिति प्रजा—पतेः। विभान्नाम। विभानिति वि—भान्। नाम लोकः। लोकस्तस्मिन्न्। तस्मिन्नेव। एवैनम्। एनम् दधाति। दधाति सह। सह यजमानेन। यजमानेन रिच्यते। रिच्यत इव। इव वै। वा एतत्। एतद् यत्। यद् यजते। यजते यत्। यद् यजमानभागम्। यजमानभागम् प्राश्ञाति। यजमानभागमिति यजमान—भागम्। प्राश्ञात्यात्मानम्। प्राश्ञातीति प्र—अश्ञाति। आत्मानमेव। एव प्रीणाति। प्रीणात्येतावान्। एतावान्वै। वै यज्ञः। यज्ञो यावान्। यावान्यजमानभागः। यजमानभागो यज्ञः। यजमानभाग इति यजमान—भागः। यज्ञो यजमानः। यजमानो यत्। यद् यजमानभागम्। यजमानभागम् प्राश्ञाति। यजमानभागमिति यजमान—भागम्। प्राश्ञाति यज्ञे। प्राश्ञातीति प्र—अश्ञाति। यज्ञ एव। एव यज्ञम्। यज्ञम् प्रति। प्रति ष्ठापयति। स्थापयत्येतत्। एतद् वै। वै सूयवसम्। सूयवसꣳ सोदकम्। सूयवसमिति सु—यवसम्। सोदकय्यँत्। सोदकमिति स—उदकम्। यद् बर्हिः। बर्हिश्च। चापः। आपश्च। चैतत्। एतद् यजमानस्य। ॥ [२२] ॥ यजमानस्यायतनम्। आयतनय्यँत्। आयतनमित्या—यतनम्। यद् वेदिः। वेदिर्,यत्। यत्,पूर्णपात्रम्॥ पूर्णपात्रमन्तर्वेदि। पूर्णपात्रमिति पूर्ण—पात्रम्। अन्तर्वेदि निनयति। अन्तर्वेदीत्यन्तः—वेदि। निनयति स्वे। निनयतीति नि—नयति। स्व एव। एवायतने। आयतने सूयवसम्। आयतन इत्या—यतने। सूयवसꣳ सोदकम्। सूयवसमिति सु—यवसम्। सोदकम् कुरुते। सोदकमिति स—उदकम्। कुरुते सत्। सदसि। असि सत्। सन्मे। मे भूयाः। भूया इति। इत्याह। आहापः। आपो वै। वै यज्ञः। यज्ञ आपः। आपो ऽमृतम्। अमृतय्यँज्ञम्। यज्ञमेव। एवामृतम्॥ अमृतमात्मन्। आत्मन्,धत्ते। धत्ते सर्वाणि। सर्वाणि वै। वै भूतानि। भूतानि व्रतम्। व्रतमुपयन्तम्। उपयन्तमनु। उपयन्तमित्युप—यन्तम्। अनूप। उप यन्ति। यन्ति प्राच्याम्। प्राच्याम् दिशि। दिशि देवाः। देवा ऋत्विजः। ऋत्विजो मार्जयन्ताम्। मार्जयन्तामिति। इत्याह। आहैषः। एष वै। वै दर्शपूर्णमासयोः। दर्शपूर्णमासयोरवभृथः। दर्शपूर्णमासयोरिति दर्श—पूर्णमासयोः। अवभृथो यानि। अवभृथ इत्यव—भृथः। ॥ [२३] ॥ यान्येव। एवैनम्। एनम् भूतानि। भूतानि व्रतम्। व्रतमुपयन्तम्। उपयन्तमनूपयन्ति। उपयन्तमित्युप—यन्तम्। अनू-

पयन्ति तैः। अनूपयन्तीत्यनु—उपयन्ति। तैरेव। एव सह। सहावभृथम्। अवभृथमव। अवभृथमित्यव—भृथम्। अवैति। एति विष्णुमुखाः। विष्णुमुखा वै। विष्णुमुखा इति विष्णु—मुखाः। वै देवाः। देवाः छन्दोभिः। छन्दोभिरिमान्। छन्दोभिरिति छन्दः—भिः। इमाँल्लोकान्। लोकाननपजय्यम्। अनपजय्यमभि। अनपजय्यमित्यनप—जय्यम्। अभ्यजयन्न्। अजयन्यत्। यद् विष्णुक्रमान्। विष्णुक्रमान्,क्रमते। विष्णुक्रमानिति विष्णु—क्रमान्। क्रमते विष्णुः। विष्णुरेव। एव भूत्वा। भूत्वा यजमानः। यजमानः छन्दोभिः। छन्दोभिरिमान्। छन्दोभिरिति छन्दः—भिः। इमाँल्लोकान्। लोकाननपजय्यम्। अनपजय्यमभि। अनपजय्यमित्यनप—जय्यम्। अभि जयति। जयति विष्णोः। विष्णोः क्रमः। क्रमोऽसि। अस्यभिमातिहा। अभिमातिहेति। अभिमातिहेत्यभिमाति—हा। इत्याह। आह गायत्री। गायत्री वै। वै पृथिवी। पृथिवी त्रैष्टुभम्। त्रैष्टुभमन्तरिक्षम्। अन्तरिक्षम् जागती। जागती द्यौः। द्यौरानुष्टुभीः। आनुष्टुभीर्,दिशः। आनुष्टुभीरित्यानु—स्तुभीः। दिशः छन्दोभिः। छन्दोभिरेव। छन्दोभिरिति छन्दः—भिः। एवेमान्। इमाँल्लोकान्। लोकान्यथापूर्वम्। यथापूर्वमभि। यथापूर्वमिति यथा—पूर्वम्। अभि जयति। जयतीति जयति॥ ॥ [२४] ॥

(यजमानेनेतिचै तदवभृथोदिशःसप्त च) ॥ ५ ॥

---

अगन्म सुवः। सुवः सुवः। सुवरगन्म। अगन्मेति। इत्याह। आह सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव लोकम्। लोकमेति। एति सन्दृशः। सन्दृशस्ते। सन्दृश इति सम्—दृशः। ते मा। मा छिथ्सि। छिथ्सि यत्। यत् ते। ते तपः। तपस्तस्मै। तस्मै ते। ते मा। मा ऽऽ वृक्षि। आ वृक्षि। वृक्षीति। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतथ् सुभूः। सुभूरसि। सुभूरिति सु—भूः। असि श्रेष्ठः। श्रेष्ठो रश्मीनाम्। रश्मीनामायुर्द्धाः। आयुर्द्धा असि। आयुर्द्धा इत्यायुः—धाः। अस्यायुः। आयुर्,मे। मे धेहि। धेहीति। इत्याह। आहाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। एवैताम्। एतामा। आ शास्ते। शास्ते प्र। प्र वै। वा एषः। एषोऽस्मात्। अस्माल्लोकात्। लोकाच्च्यवते। च्यवते यः। यो विष्णुक्रमान्। ॥ [२५] ॥ विष्णुक्रमान्,क्रमते। विष्णुक्रमानिति

विष्णु—क्रमान्। क्रमते सुवर्गाय। सुवर्गाय हि। सुवर्गायेति सुवः—गाय। हि लोकाय। लोकाय विष्णुक्रमाः। विष्णुक्रमाः क्रम्यन्ते। विष्णुक्रमा इति विष्णु—क्रमाः। क्रम्यन्ते ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति सः। स तु। त्वै। वै विष्णुक्रमान्। विष्णुक्रमान्,क्रमेत। विष्णुक्रमानिति विष्णु—क्रमान्। क्रमेत यः। य इमान्। इमाँल्लोकान्। लोकान् भ्रातृव्यस्य। भ्रातृव्यस्य संविद्य। संविद्य पुनः। संविद्येति सं—विद्य। पुनरिमम्। इमँल्लोकम्। लोकम् प्रत्यवरोहेत्। प्रत्यवरोहेदिति। प्रत्यवरोहेदिति प्रति—अवरोहेत्। इत्येषः। एष वै। वा अस्य। अस्य लोकस्य। लोकस्य प्रत्यवरोहः। प्रत्यवरोहो यत्। प्रत्यवरोह इति प्रति—अवरोहः। यदाह। आहेदम्। इदमहम्। अहममुम्। अमुम् भ्रातृव्यम्। भ्रातृव्यमाभ्यः। आभ्यो दिग्भ्यः। दिग्भ्योऽस्यै। दिग्भ्य इति दिक्—भ्यः। अस्यै दिवः। दिव इति। इतीमान्। इमानेव। एव लोकान्। लोकान् भ्रातृव्यस्य। भ्रातृव्यस्य संविद्य। संविद्य पुनः। संविद्येति सम्—विद्य। पुनरिमम्। इमँल्लोकम्। लोकम् प्रत्यवरोहति। प्रत्यवरोहति सम्। प्रत्यवरोह-तीति प्रति—अवरोहति। सम् ज्योतिषा। ॥ [२६] ॥ ज्योतिषाऽभूवम्। अभूवमिति। इत्याह। आहास्मिन्न्। अस्मिन्नेव। एव लोके। लोके प्रति। प्रति तिष्ठति। तिष्ठत्यैन्द्रीम्। ऐन्द्रीमावृतम्। आवृतमन्वावर्ते। आवृतमित्या—वृतम्। अन्वावर्त इति। अन्वावर्त इत्यनु—आवर्ते। इत्याह। आहासौ। असौ वै। वा आदित्यः। आदित्य इन्द्रः। इन्द्रस्तस्य। तस्यैव। एवावृतम्। आवृ-तमनु। आवृतमित्या—वृतम्। अनु पर्यावर्तते। पर्यावर्तते दक्षिणा। पर्यावर्तत इति परि—आवर्तते। दक्षिणा पर्यावर्तते। पर्यावर्तते स्वम्। पर्यावर्तत इति परि—आवर्तते। स्वमेव। एव वीर्यम्। वीर्यमनु। अनु पर्यावर्तते। पर्यावर्तते तस्मात्। पर्यावर्तत इति परि—आवर्तते। तस्माद् दक्षिणः। दक्षिणोऽर्द्धः। अर्द्ध आत्मनः। आत्मनो वीर्यावत्तरः। वीर्यावत्तरोऽथो। वीर्याव-त्तर इति वीर्यावत्—तरः। अथो आदित्यस्य। अथो इत्यथो। आदित्यस्यैव। एवावृतम्। आवृ-तमनु। आवृतमित्या—वृतम्। अनु पर्यावर्तते। पर्यावर्तते सम्। पर्यावर्तत इति परि—आवर्तते। समहम्। अहम् प्रजया। प्रजया सम्। प्रजयेति प्र—जया। सम् मया। मया प्रजा। प्रजेति। प्रजेति प्र—जा। इत्याह। आहाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। ॥ [२७] ॥ एवैताम्। एतामा। आ शास्ते। शास्ते समिद्धः। समिद्धो अग्ने। समिद्ध इति सम्—इद्धः। अग्ने

मे। मे दीदिहि। दीदिहि समेद्धा। समेद्धा ते। समेद्धेति सम्—एद्धा। ते अग्ने। अग्ने दीद्यासम्।
दीद्यासमिति। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्।
एतद् वसुमान्। वसुमान्यज्ञः। वसुमानिति वसु—मान्। यज्ञो वसीयान्। वसीयान्,भूयासम्।
भूयासमिति। इत्याह। आहाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। एवैताम्। एतामा।
आ शास्ते। शास्ते बहु। बहु वै। वै गार्हपत्यस्य। गार्हपत्यस्यान्ते। गार्हपत्यस्येति गार्ह—
पत्यस्य। अन्ते मिश्रम्। मिश्रमिव। इव चर्यते। चर्यत आग्निपावमानीभ्याम्। आग्निपावमा-
नीभ्याम् गार्हपत्यम्। आग्निपावमानीभ्यामित्याग्नि—पावमानीभ्याम्। गार्हपत्यमुप। गार्ह-
पत्यमिति गार्ह—पत्यम्। उप तिष्ठते। तिष्ठते पुनाति। पुनात्येव। एवाग्निम्। अग्निम् पुनीते।
पुनीत आत्मानम्। आत्मानम् द्वाभ्याम्। द्वाभ्याम् प्रतिष्ठित्यै। प्रतिष्ठित्या अग्ने। प्रतिष्ठित्या इति
प्रति—स्थित्यै। अग्ने गृहपते। गृहपत इति। गृहपत इति गृह—पते। इत्याह। आह यथा-
यजुः। ॥ [२८] ॥ यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतच्छतम्। शतꣳ
हिमाः। हिमा इति। इत्याह। आह शतम्। शतम् त्वा। त्वा हेमन्तान्। हेमन्तानिन्धिषीय।
इन्धिषीयेति। इति वाव। वावैतत्। एतदाह। आह पुत्रस्य। पुत्रस्य नाम। नाम गृह्णाति। गृह्णा-
त्यन्नादम्। अन्नादमेव। अन्नादमित्यन्न—अदम्। एवैनम्। एनम् करोति। करोति ताम्। तामा-
शिषम्। आशिषमा। आशिषमित्या—शिषम्। आ शासे। शासे तन्तवे। तन्तवे ज्योतिष्मतीम्।
ज्योतिष्मतीमिति। इति ब्रूयात्। ब्रूयाद् यस्य। यस्य पुत्रः। पुत्रोऽजातः। अजातः स्यात्। स्यात्
तेजस्वी। तेजस्व्येव। एवास्य। अस्य ब्रह्मवर्चसी। ब्रह्मवर्चसी पुत्रः। ब्रह्मवर्चसीति ब्रह्म—
वर्चसी। पुत्रो जायते। जायते ताम्। तामाशिषम्। आशिष मा। आशिषमित्या—शिषम्। आ
शासे। शासेऽमुष्मै। अमुष्मै ज्योतिष्मतीम्। ज्योतिष्मतीमिति। इति ब्रूयात्। ब्रूयाद् यस्य।
यस्य पुत्रः। पुत्रो जातः। ॥ [२९] ॥ जातः स्यात्। स्यात् तेजः। तेज एव। एवास्मिन्न्।
अस्मिन्,ब्रह्मवर्चसम्। ब्रह्मवर्चसम् दधाति। ब्रह्मवर्चसमिति ब्रह्म—वर्चसम्। दधाति यः। यो
वै। वै यज्ञम्। यज्ञम् प्रयुज्य। प्रयुज्य न। प्रयुज्येति प्र—युज्य। न विमुञ्चति। विमुञ्चत्यप्र-
तिष्ठानः। विमुञ्चतीति वि—मुञ्चति। अप्रतिष्ठानो वै। अप्रतिष्ठान इत्यप्रति—स्थानः। वै सः।
स भवति। भवति कः। कस्त्वा। त्वा युनक्ति। युनक्ति सः। स त्वा। त्वा वि। वि मुञ्चतु।

मुञ्चत्विति। इत्याह। आह प्रजापतिः। प्रजापतिर् वै। प्रजापतिरिति प्रजा—पतिः। वै कः। कः प्रजापतिना। प्रजापतिनैव। प्रजापतिनेति प्रजा—पतिना। एवैनम्। एनय्ँयुनक्ति। युनक्ति प्रजापतिना। प्रजापतिना वि। प्रजापतिनेति प्रजा—पतिना। वि मुञ्चति। मुञ्चति प्रतिष्ठित्यै। प्रतिष्ठित्या ईश्वरम्। प्रतिष्ठित्या इति प्रति—स्थित्यै। ईश्वरव्वै। वै व्रतम्। व्रतमविसृष्टम्। अवि-सृष्टम् प्रदहः। अविसृष्टमित्यवि—सृष्टम्। प्रदहोऽग्ने। प्रदह इति प्र—दहः। अग्ने व्रतपते। व्रत-पते व्रतम्। व्रतपत इति व्रत—पते। व्रतमचारिषम्। अचारिषमिति। इत्याह। आह व्रतम्। व्रतमेव। एव वि। ॥ [३०] ॥ वि सृजते। सृजते शान्त्यै। शान्त्या अप्रदाहाय। अप्रदाहाय पराङ्। अप्रदाहायेत्यप्र—दाहाय। पराङ् वाव। वाव यज्ञः। यज्ञ एति। एति न। न नि। नि वर्तते। वर्तते पुनः। पुनर्,यः। यो वै। वै यज्ञस्य। यज्ञस्य पुनरालम्भम्। पुनरालम्भ-व्विँद्वान्। पुनरालम्भमिति पुनः—आलम्भम्। विद्वान्यजते। यजते तम्। तमभि। अभि नि। नि वर्तते। वर्तते यज्ञः। यज्ञो बभूव। बभूव सः। स आ। आ बभूव। बभूवेति। इत्याह। आहैषः। एष वै। वै यज्ञस्य। यज्ञस्य पुनरालम्भः। पुनरालम्भस्तेन। पुनरालम्भ इति पुनः—आलम्भः। तेनैव। एवैनम्। एनम् पुनः। पुनरा। आ लभते। लभतेऽनवरुद्धाः। अनवरुद्धा वै। अनवरुद्धेत्यनव—रुद्धा। वा एतस्य। एतस्य विराट्। विराड् यः। विराडिति वि—राट्। य आहिताग्निः। आहिताग्निः सन्न्। आहिताग्निरित्याहित—अग्निः। सन्नसभः। असभः पशवः। पशवः खलु। खलु वै। वै ब्राह्मणस्य। ब्राह्मणस्य सभा। सभेष्ट्वा। इष्ट्वा प्राङ्। प्राङुत्क्रम्य। उत्क्रम्य ब्रूयात्। उत्क्रम्येत्युत्—क्रम्य। ब्रूयाद् गोमान्। गोमाꣳ अग्ने। गोमानिति गो—मान्। अग्नेऽविमान्। अविमाꣳ अश्वी। अविमानित्यवि—मान्। अश्वी यज्ञः। यज्ञ इति। इत्यव। अव सभाम्। सभाꣳ रुन्धे। रुन्धे प्र। प्र सहस्रम्। सहस्रम् पशून्। पशूनाप्नोति। आप्नोत्या। आऽस्य। अस्य प्रजायाम्। प्रजायाव्वाँजी। प्रजायामिति प्र—जायाम्। वाजी जायते। जायत इति जायते॥ ॥ [३१] ॥

(यःसमासिषंगृहपतइत्याहाऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोव्रतमेवखलुवैचतुर्विंꣳशतिश्च) ॥ ६ ॥

दे॑व सवितः। स॒वि॒तः प्र। प्र सु॑व। सु॒व य॒ज्ञम्। य॒ज्ञम् प्र। प्र सु॑व। सु॒व य॒ज्ञप॑तिम्। य॒ज्ञप॑तिम् भगा॑य। य॒ज्ञप॑ति॒मिति॑ य॒ज्ञ—प॒तिम्। भगा॑य दि॒व्यः। दि॒व्यो ग॑न्ध॒र्वः। ग॒न्ध॒र्व इति॑ गन्ध॒र्वः॥ के॒त॒पूः केत॑म्। के॒त॒पूरिति॑ केत—पूः। केत॑म् नः। नः॒ पु॒ना॒तु। पु॒ना॒तु वा॒चः। वा॒चस्पति॑ः। पति॑र्, वाच᳚म्। वाच॑म॒द्य। अ॒द्य स्व॑दाति। स्व॒दा॒ति नः। न॒ इति॑ नः॥ इन्द्र॑स्य वज्रः॑। वज्रो᳚ऽसि। अ॒सि॒ वार्त्र॑घ्नः। वार्त्र॑घ्न स्त्वया᳚। वार्त्र॑घ्न इ॒ति॒ वार्त्र॑—घ्नः। त्वया॒ऽयम्। अ॒यव्ँवृ॒त्रम्। वृ॒त्रँव्व॑द्ध्यात्। व॒द्ध्या॒दिति॑ वद्ध्यात्॥ वाज॑स्य नु। नु प्र॑सवे। प्र॒स॒वे मा॒तर॑म्। प्र॒स॒व इति॑ प्र—स॒वे। मा॒तर॑म् म॒हीम्। म॒हीमदि॑तिम्। अदि॑ति॒म् नाम॑। नाम॒ वच॑सा। वच॑सा करामहे। क॒रा॒म॒ह॒ इति॑ करा-महे॥ यस्या॑मि॒दम्। इ॒दव्ँविश्व᳚म्। विश्व॒म् भुव॑नम्। भुव॑नमावि॒वेश॑। आ॒वि॒वेश॒ तस्या᳚म्। आ॒वि-वे॒शेत्या᳚—वि॒वेश॑। तस्या᳚म् नः। नो॒ दे॒वः। दे॒वः स॑वि॒ता। स॒वि॒ता धर्म॑। धर्म॑ साविषत्। सा॒वि-ष॒दिति॑ साविषत्॥ अ॒फ्स्व॑न्तः। अ॒फ्स्वित्य॑प्—सु। ॥ [३२] ॥ अ॒न्तर॒मृत᳚म्। अ॒मृत॑म॒फ्सु। अ॒फ्सु भे॑ष॒जम्। अ॒फ्स्वित्य॑प्—सु। भे॒ष॒जम॒पाम्। अ॒पामु॒त। उ॒त प्रश॑स्तिषु। प्रश॑स्ति॒ष्वश्वा᳚ः। प्रश॑स्ति॒ष्विति॒ प्र—श॒स्ति॒षु। अश्वा॑ भवथ। भ॒व॒थ॒ वा॒जि॒नः। वा॒जि॒न इति॑ वाजिनः॥ वा॒युर् वा᳚। वा॒ त्वा॒। त्वा॒ मनु॑ः। मनु॑र् वा। वा॒ त्वा॒। त्वा॒ ग॒न्ध॒र्वाः। ग॒न्ध॒र्वाः स॒प्तवि॑ꣳशतिः। स॒प्तवि॑ꣳश-ति॒रिति॑ स॒प्त—वि॒ꣳश॒तिः। ते अग्रे᳚। अग्रे॒ अश्व᳚म्। अश्व॑मायुञ्जन्न्। आ॒यु॒ञ्ज॒न् ते। ते अ॑स्मिन्न्। अ॒स्मि॒ञ्जव᳚म्। ज॒वमा। आऽद॑धुः। अ॒द॒धु॒रित्य॑दधुः॥ अ॒पा᳚म् नपात्। न॒पा॒दा॒शु॒हे॒म॒न्न्। आ॒शु॒हे-म॒न्यः। आ॒शु॒हे॒म॒न्नित्या॑शु—हे॒म॒न्न्। य ऊ॒र्मिः। ऊ॒र्मिः क॒कु॒द्मान्। क॒कु॒द्मान्, प्र॒तू᳚र्तिः। क॒कु॒द्मा-निति॑ क॒कु॒त्—मा॒न्। प्र॒तू᳚र्ति॒र्, वा॒ज॒सात॑मः। प्र॒तू᳚र्ति॒रिति॑ प्र—तू॒र्तिः। वा॒ज॒सात॑म॒स्तेन॑। वा॒ज॒सा-त॑म॒ इति॑ वाज—सात॑मः। तेना॒यम्। अ॒यव्ँवाज᳚म्। वाज॑ꣳ सेत्। से॒दिति॑ सेत्॥ विष्णोः क्रम॑ः। क्रमो᳚ऽसि। अ॒सि॒ विष्णो᳚ः। विष्णो᳚ः क्रा॒न्तम्। क्रा॒न्तम॑सि। अ॒सि॒ विष्णो᳚ः। विष्णो॒र् विक्रा᳚न्तम्। विक्रा᳚न्तमसि। विक्रा᳚न्त॒मिति॒ वि—क्रा॒न्त॒म्। अ॒स्य॒ङ्कौ। अ॒ङ्कौ न्य॒ङ्कौ। न्य॒ङ्कावभित॑ः। न्य॒ङ्कावि॒ति॑ नि—अ॒ङ्कौ। अ॒भितो॒ रथ᳚म्। रथ॒य्यौँ। यौ ध्वान्तम्। ध्वा॒न्तव्ँवा॑ता॒ग्रम्। वा॒ता-ग्रमनु॑। वा॒ता॒ग्रमिति॑ वात—अ॒ग्रम्। अनु॑ स॒ञ्चर॑न्तौ। स॒ञ्चर॑न्तौ दू॒रेहे॑तिः। स॒ञ्चर॑न्ता॒विति॑ सम्—चर॑न्तौ। दू॒रेहे॑तिरिन्द्रि॒यावा॑न्। दू॒रेहे॑ति॒रिति॑ दू॒रे—हे॒तिः। इ॒न्द्रि॒यावा॑न्, पत॒त्री। इ॒न्द्रि॒यावा॒निती᳚-

न्द्रिय—वान्। पतत्री ते। ते नः। नोऽग्नयः। अग्नयः पप्रयः। पप्रयः पारयन्तु। पारयन्त्विति पारयन्तु॥ ॥ [३३] ॥

(अप्सुन्यङ्कौपञ्चदश च) ॥ ७ ॥

देवस्याहम्। अहꣳ सवितुः। सवितुः प्रसवे। प्रसवे बृहस्पतिना। प्रसव इति प्र—सवे। बृहस्पतिना वाजजिता। वाजजिता वाजम्। वाजजितेति वाज—जिता। वाजम् जेषम्। जेषम् देवस्य। देवस्याहम्। अहꣳ सवितुः। सवितुः प्रसवे। प्रसवे बृहस्पतिना। प्रसव इति प्र—सवे। बृहस्पतिना वाजजिता। वाजजिता वर्षिष्ठम्। वाजजितेति वाज—जिता। वर्षिष्ठम् नाकम्। नाकꣳ रुहेयम्। रुहेयमिन्द्राय। इन्द्राय वाचम्। वाचँव्वदत। वदतेन्द्रम्। इन्द्रँव्वाजम्। वाजम् जापयत। जापयतेन्द्रः। इन्द्रो वाजम्। वाजमजयित्। अजयिदित्यजयित्॥ अश्वाजनि वाजिनि। अश्वाजनीत्यश्व—अजनि। वाजिनि वाजेषु। वाजेषु वाजिनीवति। वाजिनीवत्यश्वान्। वाजिनीवतीति वाजिनी—वति। अश्वान्थ्समत्थ्सु। समत्थ्सु वाजय। समत्थ्स्विति समत्—सु। वाजयेति वाजय॥ अर्वाऽसि। असि सप्तिः। सप्तिरसि। असि वाजी। वाज्यसि। असि वाजिनः। वाजिनो वाजम्। वाजम् धावत। धावत मरुताम्। मरुताम् प्रसवे। प्रसवे जयत। प्रसव इति प्र—सवे। जयत वि। वि योजना। योजना मिमीद्ध्वम्। मिमीद्ध्वमद्ध्वनः। अद्ध्वनः स्कभ्नीत। स्कभ्नीत काष्ठाम्। ॥ [३४] ॥ काष्ठाम् गच्छत। गच्छत वाजेवाजे। वाजेवाजेऽवत। वाजेवाज इति वाजे—वाजे। अवत वाजिनः। वाजिनो नः। नो धनेषु। धनेषु विप्राः। विप्रा अमृताः। अमृता ऋतज्ञाः। ऋतज्ञा इत्यृत—ज्ञाः॥ अस्य मद्ध्वः। मद्ध्वः पिबत। पिबत मादयद्ध्वम्। मादयद्ध्वम् तृप्ताः। तृप्ता यात। यात पथिभिः। पथिभिर् देवयानैः। पथिभिरिति पथि—भिः। देवयानैरिति देव—यानैः॥ ते नः। नो अर्वन्तः। अर्वन्तो हवनश्रुतः। हवनश्रुतो हवम्। हवनश्रुत इति हवन—श्रुतः। हवँव्विश्वे। विश्वे शृण्वन्तु। शृण्वन्तु वाजिनः। वाजिन इति वाजिनः॥ मितद्रवः सहस्रसाः। मितद्रव इति मित—द्रवः। सहस्रसा मेधसाता। सहस्रसा इति सहस्र—साः। मेधसाता सनिष्यवः। मेधसातेति मेध—साता। सनिष्यव इति सनिष्यवः॥ महो ये। ये रत्नम्। रत्नꣳ समिथेषु। समिथेषु जभ्रिरे। समिथेष्विति

सम्—इथेषु। जभ्रिरे शम्। शम् नः। नो भवन्तु। भवन्तु वाजिनः। वाजिनो हवेषु। हवेष्विति हवेषु॥ देवताता मितद्रवः। देवतातेति देव—ताता। मितद्रवः स्वर्काः। मितद्रव इति मित—द्रवः। स्वर्का इति सु—अर्काः॥ जम्भयन्तोऽहिम्। अहिंवृकम्। वृकꣳ रख्षाꣳसि। रख्षाꣳसि सनेमि। सनेम्यस्मत्। अस्मद् युयवन्न्। युयवन्नमीवाः। ॥ [३५] ॥ अमीवा इत्यमीवाः॥ एष स्यः। स्य वाजी। वाजी ख्षिपणिम्। ख्षिपणिम् तुरण्यति। तुरण्यति ग्रीवायाम्। ग्रीवायाम् बद्धः। बद्धो अपिकख्षे। अपिकख्ष आसनि। अपिकख्ष इत्यपि—कख्षे। आसनीत्यासनि॥ क्रतुम् दधिक्राः। दधिक्रा अनु। दधिक्रा इति दधि—क्राः। अनु सन्तवीत्वत्। सन्तवीत्वत् पथाम्। सन्तवीत्वदिति सम्—तवीत्वत्। पथामङ्काꣳसि। अङ्काꣳस्यनु। अन्वापनीफणत्। आपनीफणदित्या—पनीफणत्॥ उत स्म। स्मास्य। अस्य द्रवतः। द्रवतस्तुरण्यतः। तुरण्यतः पर्णम्। पर्णम् न। न वेः। वेरनु। अनु वाति। वाति प्रगर्द्धिनः। प्रगर्द्धिन इति प्र—गर्द्धिनः॥ श्येनस्येव। इव ध्रजतः। ध्रजतो अङ्कसम्। अङ्कसम् परि। परि दधिक्राव्णः। दधिक्राव्णः सह। दधिक्राव्ण इति दधि—क्राव्णः। सहोर्जा। ऊर्जा तरित्रतः। तरित्रत इति तरित्रतः॥ आ मा। मा वाजस्य। वाजस्य प्रसवः। प्रसवो जगम्यात्। प्रसव इति प्र—सवः। जगम्यादा। आ द्यावापृथिवी। द्यावापृथिवी विश्वशम्भू। द्यावापृथिवी इति द्यावा—पृथिवी। विश्वशम्भू इति विश्व—शम्भू॥ आ मा। मा गन्ताम्। गन्ताम् पितरा। पितरा मातरा। ॥ [३६] ॥ मातरा च। चा। आ मा। मा सोमः। सोमो अमृतत्वाय। अमृतत्वाय गम्यात्। अमृतत्वायेत्यमृत—त्वाय। गम्यादिति गम्यात्॥ वाजिनो वाजजितः। वाजजितो वाजम्। वाजजित इति वाज—जितः। वाजꣳ सरिष्यन्तः। सरिष्यन्तो वाजम्। वाजम् जेष्यन्तः। जेष्यन्तो बृहस्पतेः। बृहस्पतेर् भागम्। भागमव। अव जिघ्रत। जिघ्रत वाजिनः। वाजिनो वाजजितः। वाजजितो वाजम्। वाजजित इति वाज—जितः। वाजꣳ ससृवाꣳसः। ससृवाꣳसो वाजम्। वाजम् जिगिवाꣳसः। जिगिवाꣳसो बृहस्पतेः। बृहस्पतेर् भागे। भागे नि। नि मृढ्वम्। मृढ्वमियम्। इयँवः। वः सा। सा सत्या। सत्या सन्धा। सन्धाऽभूत्। सन्धेति सम्—धा। अभूद् याम्। यामिन्द्रेण। इन्द्रेण समधद्ध्वम्। समधद्ध्वमजीजिपत। समधद्ध्वमिति

सम्—अदद्ध्वम्। अजीजिपत वनस्पतयः। वनस्पतय इन्द्रम्। इन्द्रँव्वाजम्। वाजव्विँ। वि मुच्यद्ध्वम्। मुच्यद्ध्वमिति मुच्यद्ध्वम्॥ ॥ [३७] ॥

(स्कन्नीतयुयवन्पितराद्विचत्वारिꣳशच्च) ॥ ८ ॥

ख्षत्रस्योल्बम्। उल्बमसि। असि ख्षत्रस्य। ख्षत्रस्य योनिः। योनिरसि। असि जाये। जाय आ। एहि। इहि सुवः। सुवो रोहाव। रोहाव रोहाव। रोहाव हि। हि सुवः। सुव-रहम्। अहम् नौ। नावुभयोः। उभयोः सुवः। सुवो रोख्ष्यामि। रोख्ष्यामि वाजः। वाजश्च। च प्रसवः। प्रसवश्च। प्रसव इति प्र—सवः। चापिजः। अपिजश्च। अपिज इत्यपि—जः। च क्रतुः। क्रतुश्च। च सुवः। सुवश्च। च मूर्द्धा। मूर्द्धा च। च व्यश्ञियः। व्यश्ञियश्च। व्यश्ञिय इति वि—अश्ञियः। चान्त्यायनः। आन्त्यायनश्च। चान्त्यः। अन्त्यश्च। च भौवनः। भौवनश्च। च भुवनः। भुवनश्च। चाधिपतिः। अधिपतिश्च। अधिपतिरित्यधि—पतिः। चेति च॥ आयुर्य्यज्ञेन। यज्ञेन कल्पताम्। कल्पताम् प्राणः। प्राणो यज्ञेन। प्राण इति प्र—अनः। यज्ञेन कल्पताम्। कल्पतामपानः। अपानो यज्ञेन। अपान इत्यप—अनः। ॥ [३८] ॥ यज्ञेन कल्पताम्। कल्पतावँव्यानः। व्यानो यज्ञेन। व्यान इति वि—अनः। यज्ञेन कल्पताम्। कल्पताम् चख्षुः। चख्षुर्‌यज्ञेन। यज्ञेन कल्पताम्। कल्पताꣳ श्रोत्रम्। श्रोत्रँय्यज्ञेन। यज्ञेन कल्पताम्। कल्पताम् मनः। मनो यज्ञेन। यज्ञेन कल्पताम्। कल्पतावँव्वाक्। वाग्‌यज्ञेन। यज्ञेन कल्पताम्। कल्पतामात्मा। आत्मा यज्ञेन। यज्ञेन कल्पताम्। कल्पतायँय्यज्ञः। यज्ञो यज्ञेन। यज्ञेन कल्पताम्। कल्पताꣳ सुवः। सुवर्‌देवान्। देवाꣳ अगन्म। अगन्मामृताः। अमृता अभूम। अभूम प्रजापतेः। प्रजापतेः प्रजाः। प्रजापतेरिति प्रजा—पतेः। प्रजा अभूम। प्रजा इति प्र—जाः। अभूम सम्। समहम्। अहम् प्रजया। प्रजया सम्। प्रजयेति प्र—जया। सम् मया। मया प्रजा। प्रजा सम्। प्रजेति प्र—जा। समहम्। अहꣳ रायः। रायस्पोषेण। पोषेण सम्। सम् मया। मया रायः। रायस्पोषः। पोषोऽन्नाय। अन्नाय त्वा। त्वाऽन्नाद्याय। अन्नाद्याय त्वा। अन्नाद्यायेत्यन्न—अद्याय। त्वा वाजाय। वाजाय त्वा। त्वा वाजजित्यायै। वाजजित्यायै त्वा।

वाजजित्याया इति वाज—जित्यायै। त्वाऽमृतम्। अमृतमसि। असि पुष्टिः। पुष्टिरसि। असि प्रजननम्। प्रजननमसि। प्रजननमिति प्र—जननम्। असीत्यसि॥ ॥ [३९] ॥

(अपानोवाजायनवं च) ॥ ९ ॥

वाजस्येमम्। इमम् प्रसवः। प्रसवः सुषुवे। प्रसव इति प्र—सवः। सुषुवे अग्रे। अग्रे सोमम्। सोमꣳ राजानम्। राजानमोषधीषु। ओषधीष्वप्सु। अप्स्वित्यप्—सु॥ ता अस्मभ्यम्। अस्मभ्यम् मधुमतीः। अस्मभ्यमित्यस्म—भ्यम्। मधुमतीर् भवन्तु। मधुमतीरिति मधु—मतीः। भवन्तु वयम्। वयꣳ राष्ट्रे॥ राष्ट्रे जाग्रियाम। जाग्रियाम पुरोहिताः। पुरोहिता इति पुरः—हिताः॥ वाजस्येदम्। इदम् प्रसवः। प्रसव आ। प्रसव इति प्र—सवः। आ बभूव। बभूवेमा। इमा च। च विश्वा। विश्वा भुवनानि। भुवनानि सर्वतः। सर्वत इति सर्वतः॥ स विराजम्। विराजम् परि। विराजमिति वि—राजम्। पर्येति। एति प्रजानन्न्। प्रजानन् प्रजाम्। प्रजानन्निति प्र—जानन्न्। प्रजाम् पुष्टिम्। प्रजामिति प्र—जाम्। पुष्टिँव्वर्द्धयमानः। वर्द्धयमानो अस्मे। अस्मे इत्यस्मे॥ वाजस्येमाम्। इमाम् प्रसवः। प्रसवः शिश्रिये। प्रसव इति प्र—सवः। शिश्रिये दिवम्। दिवमिमा। इमा च। च विश्वा। विश्वा भुवनानि। भुवनानि सम्राट्। सम्राडिति सम्—राट्॥ अदित्सन्तम् दापयतु। दापयतु प्रजानन्न्। प्रजानन् रयिम्। प्रजानन्निति प्र—जानन्न्। रयिम् च। ॥ [४०] ॥ च नः। नः सर्ववीराम्। सर्ववीराम् नि। सर्ववीरामिति सर्व—वीराम्। नि यच्छतु। यच्छत्विति यच्छतु॥ अग्ने अच्छ। अच्छा वद। वदेह। इह नः। नः प्रति। प्रति नः। नः सुमनाः। सुमना भव। सुमना इति सु—मनाः। भवेति भव॥ प्र णः। नो यच्छ॥ यच्छ भुवः। भुवस्पते। पते धनदाः। धनदा असि। धनदा इति धन—दाः। असि नः। नस्त्वम्। त्वमिति त्वम्॥ प्र णः। नो यच्छतु। यच्छत्वर्यमा। अर्यमा प्र। प्र भगः। भगः प्र। प्र बृहस्पतिः। बृहस्पतिरिति बृहस्पतिः॥ प्र देवाः। देवाः प्र। प्रोत। उत सूनृता। सूनृता प्र। प्र वाक्। वाग्देवी। देवी ददातु। ददातु नः। न इति नः॥ अर्यमणम् बृहस्पतिम्। बृहस्पतिमिन्द्रम्। इन्द्रम् दानाय। दानाय चोदय। चोदयेति चोदय॥ वाचँव्विष्णुम्। विष्णुꣳ सरस्वतीम्। सरस्वतीꣳ सवितारम्। सवितारम् च। ॥ [४१] ॥ च वाजिनम्। वाजिनमिति वाजिनम्॥

सोम॒ꣳ॒ राजा॑नम्। राजा॑न॒व्ँवरु॑णम्। वरु॑णम॒ग्निम्। अ॒ग्निम॒न्वार॑भामहे। अ॒न्वार॑भामह॒ इत्य॑नु—
आर॑भामहे॥ आ॒दि॒त्यान्विष्णु᳚म्। विष्णु॒ꣳ॒ सूर्य᳚म्। सूर्य॑म् ब्र॒ह्माण᳚म्। ब्र॒ह्माण॑म् च। च॒ बृह॒-
स्पति᳚म्। बृह॒स्पति॒मिति॒ बृह॒स्पति᳚म्॥ दे॒वस्य॑ त्वा। त्वा॒ स॒वि॒तुः। स॒वि॒तुः प्र॑स॒वे। प्र॒स॒वे᳚ऽश्विनोः᳚।
प्र॒स॒व इति॑ प्र—स॒वे। अ॒श्विनो᳚र्बा॒हुभ्या᳚म्। बा॒हुभ्या᳚म् पू॒ष्णः। बा॒हुभ्या॒मिति॑ बा॒हु—भ्या॒म्।
पू॒ष्णो हस्ता᳚भ्याम्। हस्ता᳚भ्या॒ꣳ॒ सर॑स्वत्यै। सर॑स्वत्यै वा॒चः। वा॒चो य॒न्तुः। य॒न्तुर् य॒न्त्रेण॑।
य॒न्त्रेणा॒ग्नेः। अ॒ग्नेस्त्वा᳚। त्वा॒ साम्रा᳚ज्येन। साम्रा᳚ज्येना॒भि। साम्रा᳚ज्येने॒ति॒ साम्—रा॒ज्ये॒न॒। अ॒भि
षि॒ञ्चामि। सि॒ञ्चा॒मीन्द्र॑स्य। इन्द्र॑स्य॒ बृह॒स्पते᳚ः। बृह॒स्पते᳚स्त्वा। त्वा॒ साम्रा᳚ज्येन। साम्रा᳚ज्येना॒भि।
साम्रा᳚ज्येने॒ति॒ साम्—रा॒ज्ये॒न॒। अ॒भि षि॒ञ्चामि। सि॒ञ्चा॒मीति॑ सिञ्चामि॥ ॥ [४२] ॥

(र॒यिꣳस॑वि॒तार॒ꣳषड्विꣳ॑शश्च) ॥ १० ॥

---

अ॒ग्निरेका᳚ख्षरेण। एका᳚ख्षरेण॒ वाच᳚म्। एका᳚ख्षरे॒णेत्येक॑—अ॒ख्ष॒रे॒ण॒। वाच॒मुत्। उद॑-
जयत्। अ॒ज॒य॒द॒श्विनौ᳚। अ॒श्विनौ॒ द्व्य॑ख्षरेण। द्व्य॑ख्षरेण प्राणापा॒नौ। द्व्य॑ख्षरे॒णेति॒ द्वि—अ॒ख्ष॒-
रे॒ण॒। प्रा॒णा॒पा॒नावुत्। प्रा॒णा॒पा॒नाविति॑ प्राण—अ॒पा॒नौ। उद॑जयताम्। अ॒ज॒य॒ता॒व्ँविष्णु॑ः। विष्णु॒ः
त्र्य॑ख्षरेण। त्र्य॑ख्षरेण॒ त्रीन्। त्र्य॑ख्षरे॒णेति॒ त्रि—अ॒ख्ष॒रे॒ण॒। त्रीँल्लो॒कान्। लो॒कानुत्। उद॑जयत्।
अ॒ज॒य॒थ् सोम॑ः। सोम॒श्चतु॑रख्षरेण। चतु॑रख्षरेण॒ चतु॑ष्पदः। चतु॑रख्षरे॒णेति॒ चतु॑ः—अ॒ख्ष॒-
रे॒ण॒। चतु॑ष्पदः प॒शून्। चतु॑ष्पद॒ इति॒ चतु॑ः—प॒दः॒। प॒शूनुत्। उद॑जयत्। अ॒ज॒य॒त् पू॒षा। पू॒षा
पञ्चा᳚ख्षरेण। पञ्चा᳚ख्षरेण प॒ङ्क्तिम्। पञ्चा᳚ख्षरे॒णेति॒ पञ्च—अ॒ख्ष॒रे॒ण॒। प॒ङ्क्तिमुत्। उद॑जयत्।
अ॒ज॒य॒द् धा॒ता। धा॒ता षड॑ख्षरेण। षड॑ख्षरेण॒ षट्। षड॑ख्षरे॒णेति॒ षट्—अ॒ख्ष॒रे॒ण॒। ष॒डृ॒तून्।
ऋ॒तूनुत्। उद॑जयत्। अ॒ज॒य॒न्म॒रुत॑ः। म॒रुत॑ः स॒प्ताख्ष॑रेण। स॒प्ताख्ष॑रेण स॒प्तप॑दाम्। स॒प्ताख्ष॑-
रे॒णेति॑ स॒प्त—अ॒ख्ष॒रे॒ण॒। स॒प्तप॑दा॒ꣳ॒ शक्व॑रीम्। स॒प्तप॑दा॒मिति॑ स॒प्त—प॒दा॒म्। शक्व॑री॒मुत्। उद॑-
जयन्न्। अ॒ज॒य॒न्बृह॒स्पति॑ः। बृह॒स्पति॑र॒ष्टाख्ष॑रेण। अ॒ष्टाख्ष॑रेण गाय॒त्रीम्। अ॒ष्टाख्ष॑रे॒णेत्य॒ष्टा—
अ॒ख्ष॒रे॒ण॒। गा॒य॒त्रीमुत्। उद॑जयत्। अ॒ज॒य॒न्मि॒त्रः। मि॒त्रो नवा᳚ख्षरेण। नवा᳚ख्षरेण त्रि॒वृत᳚म्।
नवा᳚ख्षरे॒णेति॒ नव॑—अ॒ख्ष॒रे॒ण॒। त्रि॒वृत॒ꣳ॒ स्तोम᳚म्। त्रि॒वृत॒मिति॑ त्रि—वृत᳚म्। स्तोम॒मुत्। उद॑-
जयत्। अ॒ज॒य॒द् वरु॑णः। ॥ [४३] ॥ वरु॑णो॒ दशा᳚ख्षरेण। दशा᳚ख्षरेण वि॒राज᳚म्। दशा᳚ख्ष-

रेणेति दश—अक्षरेण। विराजमुत्। विराजमिति वि—राजम्। उदजयत्। अजयदिन्द्रः। इन्द्र एकादशाक्षरेण। एकादशाक्षरेण त्रिष्टुभम्। एकादशाक्षरेणेत्येकादश—अक्षरेण। त्रिष्टुभमुत्। उदजयत्। अजयद् विश्वे। विश्वे देवाः। देवा द्वादशाक्षरेण। द्वादशाक्षरेण जगतीम्। द्वादशाक्षरेणेति द्वादश—अक्षरेण। जगतीमुत्। उदजयन्न्। अजयन्वसवः। वसवस्त्रयोदशाक्षरेण। त्रयोदशाक्षरेण त्रयोदशम्। त्रयोदशाक्षरेणेति त्रयोदश—अक्षरेण। त्रयोदशꣳ स्तोमम्। त्रयोदशमिति त्रयः—दशम्। स्तोममुत्। उदजयन्न्। अजयन्‌रुद्राः। रुद्राश्चतुर्दशाक्षरेण। चतुर्दशाक्षरेण चतुर्दशम्। चतुर्दशाक्षरेणेति चतुर्दश—अक्षरेण। चतुर्दशꣳ स्तोमम्। चतुर्दशमिति चतुः—दशम्। स्तोममुत्। उदजयन्न्। अजयन्नादित्याः। आदित्याः पञ्चदशाक्षरेण। पञ्चदशाक्षरेण पञ्चदशम्। पञ्चदशाक्षरेणेति पञ्चदश—अक्षरेण। पञ्चदशꣳ स्तोमम्। पञ्चदशमिति पञ्च—दशम्। स्तोममुत्। उदजयन्न्। अजयन्नदितिः। अदितिः षोडशाक्षरेण। षोडशाक्षरेण षोडशम्। षोडशाक्षरेणेति षोडश—अक्षरेण। षोडशꣳ स्तोमम्। स्तोममुत्। उदजयत्। अजयत्‌प्रजापतिः। प्रजापतिः सप्तदशाक्षरेण। प्रजापतिरिति प्रजा—पतिः। सप्तदशाक्षरेण सप्तदशम्। सप्तदशाक्षरेणेति सप्तदश—अक्षरेण। सप्तदशꣳ स्तोमम्। सप्तदशमिति सप्त—दशम्। स्तोममुत्। उदजयत्। अजयदित्यजयत्॥

॥ [४४] ॥

(त्रिवृतꣳ स्तोममुदजयत्षट्चत्वारिꣳशच्च) ॥ ११ ॥

उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि नृषदम्। नृषदम् त्वा। नृषदमिति नृ—सदम्। त्वा द्रुषदम्। द्रुषदम् भुवनसदम्। द्रुषदमिति द्रु—सदम्। भुवनसदमिन्द्राय। भुवनसदमिति भुवन—सदम्। इन्द्राय जुष्टम्। जुष्टम् गृह्णामि। गृह्णाम्येषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वोपयामगृहीतः। उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। अस्यप्सुषदम्। अप्सुषदम् त्वा। अप्सुषदमित्यप्सु—सदम्। त्वा घृतसदम्। घृतसदव्ँव्योमसदम्। घृतसदमिति घृत—सदम्। व्योमसदमिन्द्राय। व्योमसदमिति व्योम—सदम्। इन्द्राय जुष्टम्। जुष्टम् गृह्णामि। गृह्णाम्येषः। एष ते। ते योनिः। योनिरिन्द्राय।

इन्द्राय त्वा। त्वोपयामगृहीतः। उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि पृथिविषदम्। पृथिविषदम् त्वा। पृथिविषदमिति पृथिवि—सदम्। त्वाऽन्तरिख्षसदम्। अन्तरिख्षसदम् नाकसदम्। अन्तरिख्षसदमित्यन्तरिख्ष—सदम्। नाकसदमिन्द्राय। नाक-सदमिति नाक—सदम्। इन्द्राय जुष्टम्। जुष्टम् गृह्णामि। गृह्णाम्येषः। एष ते। ते योनिः। योनि-रिन्द्राय। इन्द्राय त्वा। त्वेति त्वा॥ ये ग्रहाः। ग्रहाः पञ्चजनीनाः। पञ्चजनीना येषाम्। पञ्च-जनीना इति पञ्च—जनीनाः। येषाम् तिस्रः। तिस्रः परमजाः। परमजा इति परम—जाः॥ दैव्यः कोशः। कोशः समुब्जितः। ॥ [४५] ॥ समुब्जित इति सं—उब्जितः॥ तेषाँविशि-प्रियाणाम्। विशिप्रियाणामिषम्। विशिप्रियाणामिति वि—शिप्रियाणाम्। इषमूर्जम्। ऊर्जꣳ सम्। समग्रभीम्। अग्रभीमेषः। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वेति त्वा॥ अपाꣳ रसम्। रसमुद्वयसम्। उद्वयसꣳ सूर्यरश्मिम्। उद्वयसमित्युत्—वयसम्। सूर्यरश्मिꣳ समाभृतम्। सूर्यरश्मिमिति सूर्य—रश्मिम्। समाभृतमिति सम्—आभृतम्॥ अपाꣳ रसस्य। रसस्य यः। यो रसः। रसस्तम्। तव्वः। वो गृह्णामि। गृह्णाम्युत्तमम्। उत्तममेषः। उत्तम-मित्युत्—तमम्। एष ते। ते योनिः। योनिरिन्द्राय। इन्द्राय त्वा। त्वेति त्वा॥ अया विष्ठाः। विष्ठा जनयन्न्। विष्ठा इति वि—स्थाः। जनयन् कर्वराणि। कर्वराणि सः। स हि। हि घृणिः। घृणिरुरुः। उरुर् वराय। वराय गातुः। गातुरिति गातुः॥ स प्रति। प्रत्युत्। उदैत्। ऐद्धरुणः। धरुणो मद्ध्वः। मद्ध्वो अग्रम्। अग्रꣳ स्वायाम्। स्वायाय्यँत्। यत् तनुवाम्। तनुवाम् तनूम्। तनूमैरयत। ऐरयतेत्यैरयत॥ उपयामगृहीतोऽसि। उपयामगृहीत इत्युपयाम—गृहीतः। असि प्रजापतये। प्रजापतये त्वा। प्रजापतय इति प्रजा—पतये। त्वा जुष्टम्। जुष्टम् गृह्णामि। गृह्णा-म्येषः। एष ते। ते योनिः। योनिः प्रजापतये। प्रजापतये त्वा। प्रजापतय इति प्रजा—पतये। त्वेति त्वा॥ ॥ [४६] ॥

(कोशास्तनुवांत्रयोदश च) ॥ १२ ॥

अन्वह। अह मासाः। मासा अनु। अन्वित्। इद् वनानि। वनान्यनु। अन्वोषधीः। ओष-धीरनु। अनु पर्वतासः। पर्वतास इति पर्वतासः॥ अन्विन्द्रम्। इन्द्रꣳ रोदसी। रोदसी वाव-

शाने। रोदसी इति रोदसी। वावशाने अनु। वावशाने इति वावशाने। अन्वापः। आपो अजि-
हत। अजिहत जायमानम्। जायमानमिति जायमानम्॥ अनु ते। ते दायि। दायि महे। मह
इन्द्रियाय। इन्द्रियाय सत्रा। सत्रा ते। ते विश्वम्। विश्वमनु। अनु वृत्रहत्ये। वृत्रहत्य इति
वृत्र—हत्ये। अनु ख्षत्रम्। ख्षत्रमनु। अनु सहः। सहो यजत्र। यजत्रेन्द्र। इन्द्र देवेभिः।
देवेभिरनु। अनु ते। ते नृषह्ये। नृषह्य इति नृ—सह्ये॥ इन्द्राणीमासु। आसु नारिषु। नारिषु
सुपत्नीम्। सुपत्नीमहम्। सुपत्नीमिति सु—पत्नीम्। अहमश्रवम्। अश्रवमित्यश्रवम्॥ न हि।
ह्यस्याः। अस्या अपरम्। अपरम् चन। चन जरसा। जरसा मरते। ॥ [४७] ॥ मरते पतिः।
पतिरिति पतिः॥ नाहम्। अहमिन्द्राणि। इन्द्राणि रारण। रारण सख्युः। सख्युर्,वृषाकपेः।
वृषाकपेर्ऋते। वृषाकपेरिति वृषा—कपेः। ऋत इत्यृते॥ यस्येदम्। इदमप्यम्। अप्यꣳ हविः।
हविः प्रियम्। प्रियम् देवेषु। देवेषु गच्छति। गच्छतीति गच्छति॥ यो जातः। जात एव। एव
प्रथमः। प्रथमो मनस्वान्। मनस्वान् देवः। देवो देवान्। देवान्,क्रतुना। क्रतुना पर्यभूषत्।
पर्यभूषदिति परि—अभूषत्। यस्य शुष्मात्। शुष्माद् रोदसी। रोदसी अभ्यसेताम्। रोदसी
इति रोदसी। अभ्यसेताम् नृम्णस्य। नृम्णस्य मह्ना। मह्ना सः। स जनासः। जनास इन्द्रः।
इन्द्र इतीन्द्रः॥ आ ते। ते महः। मह इन्द्र। इन्द्रोती। ऊत्युग्र। उग्र समन्यवः। समन्यवो
यत्। समन्यव इति स—मन्यवः। यथ् समरन्त। समरन्त सेनाः। समरन्तेति सम्—अरन्तः।
सेना इति सेनाः॥ पताति दिद्युत्। दिद्युन्नर्यस्य। नर्यस्य बाहुवोः। बाहुवोर् मा। मा ते। ते
मनः। ॥ [४८] ॥ मनो विष्वद्रियक्। विष्वद्रियग् वि। विष्वद्रियगिति विष्व—द्रियक्। वि
चारीत्। चारीदिति चारीत्॥ मा नः। नो मर्द्धीः। मर्द्धीरा। आ भर। भरा दद्धि। दद्धि तत्।
तन्नः। नः प्र। प्र दाशुषे। दाशुषे दातवे। दातवे भूरि। भूरि यत्। यत् ते। त इति ते॥ नव्ये
देष्णे। देष्णे शस्ते। शस्ते अस्मिन्न्। अस्मिन् ते। त उक्थे। उक्थे प्र। प्र ब्रवाम। ब्रवाम
वयम्। वयमिन्द्र। इन्द्र स्तुवन्तः। स्तुवन्त इति स्तुवन्तः॥ आ तु। तू भर। भर माकिः।
माकिरेतत्। एतत्,परि। परि ष्ठात्। स्थाद् विद्म। विद्मा हि। हि त्वा। त्वा वसुपतिम्। वसु-
पतिँव्वसूनाम्। वसुपतिमिति वसु—पतिम्। वसूनामिति वसूनाम्॥ इन्द्र यत्। यत् ते। ते
माहिनम्। माहिनम् दत्रम्। दत्रमस्ति। अस्त्यस्मभ्यम्। अस्मभ्यम् तत्। अस्मभ्यमित्यस्म—

भ्यम्। तद्धर्यश्व। हर्यश्व प्र। हर्यश्वेति हरि—अश्व। ॥ [४९] ॥ प्र यन्धि। यन्धीति यन्धि॥ प्रदातारꣳ हवामहे। प्रदातारमिति प्र—दातारम्। हवामह इन्द्रम्। इन्द्रमा। आ हविषा। हविषा वयम्। वयमिति वयम्॥ उभा हि। हि हस्ता। हस्ता वसुना। वसुना पृणस्व। पृणस्वा। आ प्र। प्र यच्छ। यच्छ दक्षिणात्। दक्षिणादा। ओत। उत सव्यात्। सव्यादिति सव्यात्॥ प्रदाता वज्री। प्रदातेति प्र—दाता। वज्री वृषभः। वृषभ,स्तुराषाट्। तुराषाट् छुष्मी। शुष्मी राजा। राजा वृत्रहा। वृत्रहा सोमपावा। वृत्रहेति वृत्र—हा। सोमपावेति सोम—पावा॥ अस्मिन्यज्ञे। यज्ञे बर्हिषि। बर्हिष्या। आ निषद्य। निषद्याथ। निषद्येति नि—सद्य। अथा भव। भव यजमानाय। यजमानाय शम्। शय्योः। योरिति योः॥ इन्द्रः सुत्रामा। सुत्रामा स्ववान्। सुत्रामेति सु—त्रामा। स्ववाꣳ अवोभिः। स्ववानिति स्व—वान्। अवोभिः सुमृडीकः। अवोभिरित्यवः—भिः। सुमृडीको भवतु। सुमृडीक इति सु—मृडीकः। भवतु विश्ववेदाः। विश्ववेदा इति विश्व—वेदाः॥ बाधताम् द्वेषः। द्वेषो अभयम्। अभयम् कृणोतु। कृणोतु सुवीर्यस्य। सुवीर्यस्य पतयः। सुवीर्यस्येति सु—वीर्यस्य। ॥ [५०] ॥ पतयः स्याम। स्यामेति स्याम॥ तस्य वयम्। वयꣳ सुमतौ। सुमतौ यज्ञियस्य। सुमताविति सु—मतौ। यज्ञियस्यापि। अपि भद्रे। भद्रे सौमनसे। सौमनसे स्याम। स्यामेति स्याम॥ स सुत्रामा। सुत्रामा स्ववान्। सुत्रामेति सु—त्रामा। स्ववाꣳ इन्द्रः। स्ववानिति स्व—वान्। इन्द्रो अस्मे। अस्मे आरात्। अस्मे इत्यस्मे। आराच्चित्। चिद् द्वेषः। द्वेषः सनुतः। सनुतर् युयोतु। युयोत्विति युयोतु॥ रेवतीर् नः। नः सधमादः। सधमाद इन्द्रे। सधमाद इति सध—मादः। इन्द्रे सन्तु। सन्तु तुविवाजाः। तुविवाजा इति तुवि—वाजाः॥ क्षुमन्तो याभिः। याभिर्,मदेम। मदेमेति मदेम॥ प्रो षु। प्रो इति प्रो। स्वस्मै। अस्मै पुरोरथम्। पुरोरथमिन्द्राय। पुरोरथमिति पुरः—रथम्। इन्द्राय शूषम्। शूषमर्चत। अर्चतेत्यर्चत॥ अभीके चित्। चिदु। उ लोककृत्। लोककृथ् सङ्गे। लोककृदिति लोक—कृत्। सङ्गे समथ्सु। समथ्सु वृत्रहा। समथ्स्विति समत्—सु। वृत्रहेति वृत्र—हा॥ अस्माकम् बोधि। बोधि चोदिता। चोदिता नभन्ताम्। नभन्तामन्यकेषाम्। अन्यकेषामित्यन्यकेषाम्॥ ज्याका अधि। अधि धन्वसु। धन्वस्विति धन्व—सु॥ ॥ [५१] ॥

(जरसामा तेहर्यश्वसुवीर्यस्याऽध्येकं च) ॥ १३ ॥

॥ हरिः ॐ ॥

## प्रथमकाण्डे सप्तमः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १३ | ५१ |

ॐ